# ॥ જગન્મઙ્ગલકવચસ્તોત્રમ્ ॥

.. jaganma Ngalakavachastotram ..

sanskritdocuments.org

August 20, 2017

# .. jaganma Ngalakavachastotram ..

# ॥ જગન્મઙ્ગલકવચસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : jaganmangalakavachastotram

File name : jaganmangalakavachastotram.itx

Category : kavacha, vishhnu

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ જગન્મઙ્ગલકવચસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

શ્રીરાધારમણાય નમઃ ॥

શ્રીસનત્કુમાર ઉવાચ ।
બ્રૂહિ મે કવચં બ્રહ્મન્ જગન્મઙ્ગલમઙ્ગમ્ ।
પૂજ્યં પુણ્યસ્વરૂપં ચ કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૧॥

બ્રહ્મોવાચ ।
શૃણુ વક્ષ્યામિ વિપ્રેન્દ્ર કવચં પરમાદ્ભુતમ્ ।
શ્રીકૃષ્ણેનૈવ કથિતં મહ્યં ચ કૃપયા પુરા ॥ ૨॥

મયા દત્તં ચ ધર્માય તેન નારાયણર્ષયે ।
ઋષિણા તેન તદ્દત્તં સુભદ્રાય મહાત્મને ॥ ૩॥

અતિગુહ્યતમં શુદ્ધં પરં સ્નેહાદ્ધદામ્યહમ્ ।
યદ્ધૃત્વા પઠનાત્સિદ્ધાઃ સિદ્ધ્યાદિ પ્રાપ્નુવન્તિ ચ ॥ ૪॥

એવમિન્દ્રાદયઃ સર્વે સર્વૈશ્વર્યમવાપ્નુયુઃ ।
ઋષિશ્છન્દશ્ચ સાવિત્રી દેવો નારાયણઃ સ્વયમ્ ॥ ૫॥

ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
ઓં રાધેશો મે શિરઃ પાતુ કણ્ઠં રાધેશ્વરઃ સ્વયમ્ ॥ ૬॥

ગોપીશશ્ચક્ષુષી પાતુ તાલું ચ ભગવાન્સ્વયમ્ ।
ગણ્ડયુગ્મં ચ ગોવિન્દઃ કર્ણયુગ્મં ચ કેશવઃ ॥ ૭॥

ગલં ગદાધરઃ પાતુ સ્કન્ધં કૃષ્ણઃ સ્વયમ્પ્રભુઃ ।
વક્ષઃસ્થલં વાસુદેવશ્ચોદરં ચાપિ સોઽચ્યુતઃ ॥ ૮॥

નાભિં પાતુ પદ્મનાભઃ કઙ્કાલં કંસસૂદનઃ ।
પુરુષોત્તમઃ પાતુ પૃષ્ઠં નિત્યાનન્દો નિતમ્બકમ્ ॥ ૯॥

પુણ્ડરીકઃ પાદયુગ્મં હસ્તયુગ્મં હરિઃ સ્વયમ્ ।
નાસાં ચ નખરં પાતુ નરસિંહઃ સ્વયમ્પ્રભુઃ ॥ ૧૦॥

સર્વેશ્વરશ્ચ સર્વાઙ્ગં સતતં મધુસૂદનઃ ।

પ્રાચ્યાં પાતુ ચ રામશ્ચ વહ્નૌ વંશીધરઃ સ્વયમ્ ॥ ૧૧॥

પાતુ દામોદરો દક્ષે નૈરૃત્યે ચ નરોત્તમઃ ।
પશ્ચિમે પુણ્ડરીકાક્ષો વાયવ્યાં વામનઃ સ્વયમ્ ॥ ૧૨॥

અનન્તશ્ચોત્તરે પાતુ ઐશાન્યામીશ્વરઃ સ્વયમ્ ।
જલે સ્થલે ચાન્તરિક્ષે સ્વપ્ને જાગરણે તથા ॥ ૧૩॥

પાતુ વૃન્દાવનેશશ્ચ માં ભક્તં શરણાગતમ્ ।
ઇતિ તે કથિતં વત્સ કવચં પરમાદ્ભુતમ્ ॥ ૧૪॥

સુખદં મોક્ષદં સારં સર્વસિદ્ધિપ્રદં સતામ્ ।
ઇદં કવચમિષ્ટં ચ પૂજાકાલે ચ યઃ પઠેત્ ॥ ૧૫॥

હરિદાસ્યમવાપ્નોતિ ગોલોકે વાસમુત્તમમ્ ।
ઇહૈવ હરિભક્તિં ચ જીવન્મુક્તો ભવેન્નરઃ ॥ ૧૬॥

ઇતિ શ્રીનારદપઞ્ચરાત્રે જ્ઞાનામૃતસારે પ્રથમૈકરાત્રે
બ્રહ્મનારદસંવાદે જગન્મઙ્ગલકવચં સમાપ્તમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. jaganma Ngalakavachastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*